दण्डधरे, त्रि । यथा, महाभारते । १।१३६।२८।
"भीमसेनो महाबाहुर्द्दण्डपाणिरिवान्तकः ।
प्रविवेश महासेनां मकरः सागरं यथा ॥")

दण्डपारुष्यं, क्ली, (दण्डेन यत् पारुष्यं परुषता । दण्ड्यतेऽनेनेति दण्डो देहस्तेन यत् पारुष्यं विरुद्धाचरणमिति मिताक्षरा ।) राज्ञां सप्तव्यसनान्तर्गतव्यसनविशेषः । इति हेमचन्द्रः । ३ । ४०३ ॥ अष्टादशविवादान्तर्गतविवादविशेषः । तत्तु ताडनादि । इति मनुटीकायां कुल्लूकभट्टः ॥ (यथा, मनुः । ८ । २७८ ।
"अत ऊर्द्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥")

दण्डपालः, पुं, (दण्डं शरीरं पालयतीति । पालि + अण् ।) अर्द्धशफरमत्स्यः । दाँड़िका इति भाषा । इति हारावली । १६० ॥ (दण्डेन पालयतीति । पालि + अच् ।) द्वारपालः ॥

दण्डपालकः, पुं, (दण्डपालवत् कायतीति । कै + कः ।) शकुलमत्स्यः । इति हारावली । १६१ ॥

दण्डबालधिः, पुं, (दण्ड इव बालधिर्यस्य ।) हस्ती । इति शब्दरत्नावली ॥

दण्डभृत्, पुं, (दण्डं चक्रभ्रामणार्थं लगुडादिकं बिभर्त्तीति । भृ + क्विप् तुगागमश्च ।) कुम्भकारः । इति त्रिकाण्डशेषः ॥ (दण्डं दमनं बिभर्त्तीति ।) दण्डधारके, त्रि ॥

दण्डयात्रा, स्त्री, (दण्डाय शत्रुदमनाय या यात्रा प्रयाणम् ।) दिग्विजयः । संयानम् । वरयात्रा । इति मेदिनी । रे, २६५ ॥

दण्डयामः, पुं, (दण्डं यच्छतीति । यम + अण् ।) यमः । दिनम् । अगस्त्यः । इति मेदिनी । मे, ६० ॥

दण्डरी, स्त्री, डङ्गरीफलम् । इति राजनिर्घण्टः ॥

दण्डवादी, [न्] पुं, (दण्डेन वदतीति । वद + णिनिः ।) दर्ब्बटः । द्वारपालः । इति हारावली । १२८ ॥ दण्डवक्तरि, त्रि ॥

दण्डवासी, [न्] पुं, (दण्डेन वसतीति । वस + णिनिः ।) द्वारपालः । इति त्रिकाण्डशेषः ॥ एकग्रामाधिकृतजनः । इति जटाधरः ॥

दण्डविष्कम्भः, पुं, (दण्डं मन्थानदण्डं विष्कभ्नाति निबध्नाति यत्र । वि + स्कम्भ + अधिकरणे घञ् । वेः स्कभ्नातेर्नित्यमिति षत्वम् ।) यत्र स्तम्भादौ आकर्षणार्थं रज्वा दण्डो निबध्यते सः । घोलमओया खुँटी इति भाषा । तत्पर्य्यायः । कुठरः २ । इत्यमरः । २।६।७४ ॥

दण्डवृन्तकः, पुं, (पत्रविहीनत्वात् दण्ड इव वृन्तः । ततः स्वार्थे कन् ।) स्नुही । इति राजनिर्घण्टः ॥

दण्डहस्तं, क्ली, (दण्ड इव हस्तो वृन्तरूपो यस्य ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

दण्डाजिनं, क्ली, शाठ्यम् । इति शब्दार्थकल्पतरुः ॥ (कपटिनां बहिर्दृश्यादिकं यतीनां दण्डाजिनवत् आश्रमलिङ्गत्वेन प्रतीयमानत्वात् तदर्थोऽचोपपद्यते । दण्डश्च अजिनञ्च द्वयोः समाहारः । यतीनां दण्डं मृगचर्म्म च । यथा, देवीभागवते । १ । १६ । ३१ ।
"दण्डाजिनकृता चिन्ता यथा तव वनेऽपि च ।
तथैव राज्यचिन्ता मे चिन्त्यमानस्य वा न वा ॥")

दण्डादण्डि, अ, (दण्डैश्च दण्डैश्च प्रहृत्य प्रवृत्तं युद्धम् । "इच् कर्म्मव्यतिहारे ।" ५ । ४ । १२७ । इति इच् ।) परस्परदण्डकरणकप्रहाररूपयुद्धम् । इति व्याकरणम् ॥ लाठालाठि इति भाषा ॥

दण्डारः, पुं, (दण्डं ऋच्छतीति । ऋ + अण् ।) वाहनम् । मत्तहस्ती । शरयन्त्रकम् । कुम्भकारस्य चक्रम् । इति मेदिनी । रे, १६८ ॥

दण्डाहतं, क्ली, (दण्डेन आहतम् ।) घोलम् । इत्यमरः ।२।६।५३ ॥ (दण्डेन ताडिते, त्रि ॥)

दण्डिकः, पुं, (दण्डोऽस्यस्येति । दण्ड + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) दण्डधारकः । छड़िबरदार इति आसावरदार इति च भाषा । मत्स्यविशेषः । डानिकणा माछ इति भाषा । अस्य गुणाः । कफवायुपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ (दण्डदातरि नियामके, त्रि । यथा, महाभारते । ६ । ११ । ३६ ।
"न तत्र राजा राजेन्द्र ! न दण्डो न च दण्डिकः ।
स्वधर्म्मेणैव धर्म्मज्ञ ! ते रक्षन्ति परस्परम् ॥")

दण्डिका, स्त्री, (दण्डवदाकृतिरस्त्यस्याः । दण्ड + ठन् + टाप् ।) हारविशेषः । इति जटाधरः ॥ रज्जुः । यथा, अङ्गुल्योत्कर्षं दण्डिकां छिनत्ति । इति सुपद्मव्याकरणम् ॥ दण्डिका रज्जुरिति तट्टीकाकारः ॥

दण्डितः, त्रि, (दण्डः सञ्जातोऽस्येति । दण्ड + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५।२।३६। इति इतच् ।) कृतदण्डः । तत्पर्य्यायः । शासितः २ साधितः ३ । इति हेमचन्द्रः ॥

दण्डी, [न्] पुं, (दण्डोऽस्यस्येति । दण्ड + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) जिनविशेषः । इति त्रिकाण्डशेषः ॥ (स तु कवीनामन्यतमः काव्यादर्शदशकुमारचरितादिग्रन्थप्रणेता । शङ्कराचार्य्यसमकालीनोऽयम् । यथा, शङ्करविजये । १५ । १४० ।
"स कथाभिरवन्तिषु प्रसिद्धान्
विबुधान् बाणमयूरदण्डिमुख्यान् ।
शिथिलीकृतदुर्म्मताभिमानान्
निजभाष्यश्रवणोत्सुकांश्चकार ॥")
यथा, कालिदासः ।
"जाते जगति वाल्मीके कविरित्यभिधीयते ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥"
दमनकवृक्षः । इति राजनिर्घण्टः ॥ यमः । (यथा, महाभारते । १ । १६० । १७ ।
"तं वृक्षमादाय रिपुप्रमाथी
दण्डीव दण्डं पितृराज उग्रम् ॥")
द्वाःस्थः । चतुर्थाश्रमी । (अस्य व्यवहारादिकं यदुक्तं मनौ । ६ । ४१-५८ ।
"आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढ़ेषु कामेषु निरपेक्षः परिव्रजेत् ॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य संपश्यन्न जहाति न हीयते ॥
अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसङ्कुसुको मुनिर्भावसमाहितः ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्द्देशं भृतको यथा ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत् ॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्व्वान्यैरागारमुपसंव्रजेत् ॥
क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्व्वभूतान्यपीडयन् ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥
अलावुं दारुपात्रञ्च मृण्मयं वैदलन्तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालञ्चरेद्भैक्षं न प्रसज्जेत विस्तरे ।
भैक्षे प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यात् मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्म्मुक्तोऽपि बध्यते ॥"
दण्डग्रहणादेव दण्डी । भार्य्यादिषु विद्यमानेषु दण्डग्रहणेन प्रत्यवायो जायते । यदुक्तं महानिर्व्वाणतन्त्रे १३ पटले ।
"स्थितायां यौवनयुतकान्तायां परमेश्वरि ! ।
सर्व्वं हि विफलं तस्य यः कुर्य्याद्दण्डधारणम् ॥
विद्यते पितरौ देवि ! यः कुर्य्याद्दण्डधारणम् ।
सन्न्यासं विफलं तस्य रौरवाख्यं गमिष्यति ॥
विद्यते बालभावेन यस्य कान्ता सुतस्तथा ।
सन्न्यासधारणं तस्य वृथा हि परमेश्वरि ! ॥
सगुरुश्चापि शिष्यश्च रौरवाख्यं प्रपद्यते ॥"
अधुनातनदण्डिनस्तु प्रायशः शङ्कराचार्य्यसम्प्रदायान्तर्गता अतस्तेषां निर्गुणब्रह्मोपासनैव परमो धर्म्मः । एते तु मुण्डिनः प्रायशः परिहितरञ्जितवस्त्रा रुद्राक्षमालाधारिणश्च । दण्डिनस्तु द्वादशवर्षपर्य्यन्तं भिक्षापर्य्यटनादिकं विधाय दण्डान् परित्यज्य परमहंसाश्रममाश्र-